# Shri Raghavendra Gatha Stuti

# શ્રીરાઘવેન્દ્રગાથાસ્તુતિઃ

## Document Information

Text title : Shri Raghavendra Gatha Stuti

File name : rAghavendragAthAstutiH.itx

Category : deities_misc, gurudev, stuti

Location : doc_deities_misc

Author : Krishna Avadhutapandita Vedavyasacharya

Proofread by : Gopalakrishnan, PSA Easwaran

Description/comments : from Raghavendra Tantram

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રગાથાસ્તુતિઃ

અજ્ઞાનનાશાય વિજ્ઞાનપૂર્ણાય સુજ્ઞાનદાત્રે નમસ્તે ગુરો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૧॥

આનન્દરૂપાય નન્દાત્મજાશ્રીપદામ્ભોજભાજે નમસ્તે ગુરો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૨॥

ઇષ્ટપ્રદાનેન કષ્ટપ્રહાણેન શિષ્ટસ્તુત શ્રીપદામ્ભોજ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૩॥

ઈડે ભવત્પાદપાથોજમાધ્યાય ભૂયોઽપિ ભૂયો ભયાત્ પાહિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૪॥

ઉગ્રં પિશાચાદિકં દ્રાવયિત્વાઽઽશુ સૌખ્યં જનાનાં કરોષીશ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૫॥

ઊર્જત્કૃપાપૂર પાથોનિધે મઙ્ક્ષુ તુષ્ટોઽનુગૃહ્ણાસિ ભક્તાન્ વિભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૬॥

ઋજૂત્તમ પ્રાણપાદાર્જનપ્રાપ્તમાહાત્મ્ય સમ્પૂર્ણસિદ્ધેશ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૭॥

ઋજુસ્વભાવાપ્તભક્તેષ્ટકલ્પદ્રુરૂપેશભૂપાદિવન્દ્ય પ્રભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૮॥

ઋદ્ધં યશસ્તે વિભાતિ પ્રકૃષ્ટં પ્રપન્નાર્તિહન્તર્મહોદાર ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૯॥

ક્લૃપ્તાતિભક્તૌઘકામ્યાર્થદાતર્ભવામ્ભોધિપારઙ્ગત પ્રાજ્ઞ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૧૦॥

એકાન્તભક્તાય માકાન્તપાદાબ્જ ઉચ્ચાય લોકે નમસ્તે વિભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૧૧॥

ઐશ્વર્યભૂમન્ મહાભાગ્યદાયિન્ પરેષાં ચ કૃત્યાદિ નાશિન્ પ્રભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૧૨॥

ઓઙ્કારવાચ્યાર્થભાવેન ભાવેન લબ્ધોદયશ્રીશ યોગીશ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૧૩॥

ઔર્વાનલપ્રખ્ય દુર્વાદિ દાવનલૈઃ સર્વતન્ત્રસ્વતન્ત્રેશ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૧૪॥

અમ્ભોજ સમ્ભૂત મુખ્યામરારાધ્ય ભૂનાથભક્તેશ ભાવજ્ઞ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૧૫॥

અસ્તઙ્ગતાનેક માયદિવાદીશ વિદ્યોતિતાશેષવેદાન્ત ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૧૬॥

કામ્યાર્થદાનાય બદ્ધાદરાશેષલોકાય સેવાનુસક્તાય ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૧૭॥

ખદ્યોતસારેષુ પ્રત્યર્થિસાર્થેષુ મધ્યાહ્નમાર્તાણ્ડબિમ્બાભ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૧૮॥

ગર્વિષ્ઠ ગર્વામ્બુશોષાર્યમાત્યુગ્ર નમ્રામ્બુધેર્યામિનીનાથ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૧૯॥

ઘોરામયધ્વાન્તવિધ્વંસનોદ્દામ દેદીપ્યમાનાર્કબિમ્બાભ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૨૦॥

ઙણત્કાર દણ્ડાઙ્ક કાષાયવસ્ત્રાઙ્કુક કૌપીન પીનાઙ્ક હંસાઙ્ક ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૨૧॥

ચણ્ડીશ કાણ્ડેશ પાખણ્ડવાક્કાણ્ડતામિસ્રમાર્તાણ્ડપાષણ્ડ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૨૨॥

છદ્માણુભાગં ન વિદ્મસ્ત્વદન્તઃ સુસદ્મૈવ મદ્માધવસ્યાસિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૨૩॥

જાડ્યં હિનસ્તિ જ્વરાર્શઃક્ષયાદ્યાશુ તે પાદપદ્મામ્બુલેશોઽપિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૨૪॥

ઝષધ્વજીયેષ્વલભ્યોરુચેતઃ સમારૂઢમારૂઢવક્ષોઽઙ્ગ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૨૫॥

યાજ્ઞાવિહીનાય યાદૃચ્છિકપ્રાપ્તતુષ્ટાય સદ્યઃ પ્રપન્નોઽસિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૨૬॥

ટીકારહસ્યાર્થવિખ્યાપનગ્રન્થવિસ્તારલોકોપકર્તઃ પ્રભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૨૭॥

ઠક્કુર્વરીણામમેયપ્રભાવોદ્ધરાપારસંસારતો માં પ્રભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૨૮॥

ડાકિન્યપસ્મારઘોરાદિકોગ્રગ્રહોચ્ચાટનોદગ્રવીરાગ્ર્ય ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૨૯॥

ઢક્કાદિકધ્વાનવિદ્રાવિનાનેકદુર્વાદિગોમાયુસઙ્ઘાત ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૩૦॥

ણાત્માદિમાત્રર્ણલક્ષ્યાર્થકશ્રીપતિધ્યાનસન્નદ્ધધીસિદ્ધ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૩૧॥

તાપત્રયપ્રૌઢબાધાભિભૂતસ્ય ભક્તસ્ય તાપત્રયં હંસિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૩૨॥

સ્થાનત્રયપ્રાપકજ્ઞાનદાતઃ સ્ત્રિધામાઙ્ઘ્રિભક્તિં પ્રયચ્છ પ્રભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૩૩॥

દારિદ્ર્ય દારિદ્ર્યયોગેન યોગેન સમ્પન્નસમ્પત્તિમાધેહિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૩૪॥

ધાવન્તિ તે નામધેયાભિસઙ્કીર્તનેનૈનસામાશુ વૃન્દાનિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૩૫॥

નાનાવિધાનેકજન્માદિદુઃખૌઘતઃ સાધ્વસં સંહરોદાર ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૩૬॥

પાતા ત્વમેવેતિ માતા ત્વમેવેતિ મિત્રં ત્વમેવેત્યહં વેદ્મિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૩૭॥

ભાલસ્થદુર્દૈવવર્ણાવલીકાર્યલોપોઽપિ ભક્તસ્ય શક્તોઽસિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૩૮॥

બદ્ધોઽસ્મિ સંસારપાશેન તેઽઙ્ઘ્રિં વિનાઽન્યાગતિર્નેત્યવેમિ પ્રભો ।

શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૩૯॥

ભાવં ભજામીહ વાચા વદામિ ત્વદીયં પદં દણ્ડવત્ સ્વામિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૪૦॥

માન્યેષુ માન્યોઽસિ મત્યા ચ ધૃત્યા ચ મામદ્ય માન્યં કુરુ દ્રાગ્ વિભો
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૪૧॥

યં કામમાકામયે તં ન ચાપં તતસ્ત્વં શરણ્યો ભવત્યેમિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૪૨॥

રાજાદિવશ્યાદિ કુક્ષિમ્ભરાનેકચાતુર્યવિદ્યાસુ મૂઢોઽસ્મિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૪૩॥

લક્ષેષુ તે ભક્તવર્ગેષુ કુર્વેક લક્ષ્યં કૃપાપાઙ્ગલેશસ્ય મામ્ ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૪૪॥

વારાઙ્ગનાદ્યૂતચૌર્યાન્યદારાતુરત્વાદ્યવદ્યત્વતો માં પ્રભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૪૫॥

શક્તો ન શક્તિં તવ સ્તોતુમાધ્યાતુમીદૃક્ત્વહં કરોમીશ કિં ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૪૬॥

ષડ્વૈરિવર્ગં મમારાન્નિરાકુર્વમન્દો હરેરાઙ્ઘ્રિરાગોઽસ્તુ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૪૭॥

સન્માર્ગસચ્છાસ્ત્રસત્સઙ્ગસદ્ભક્તિસજ્જ્ઞાનસમ્પત્તિમાધેહિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૪૮॥

હાસ્યાસ્પદોઽહં સમાનેષ્વકીર્ત્યા તવાઙ્ઘ્રિં પ્રપન્નોઽસ્મિ સંરક્ષ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૪૯॥

લક્ષ્મીવિહીનત્વહેતોઃ સ્વકીયૈઃ સુદૂરીકૃતોઽસ્મ્યદ્ય વાચ્યોઽસ્મિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૫૦॥

ક્ષેમઙ્કરસ્ત્વં ભવામ્ભોદિમજ્જજ્જનાનામિતિ ત્વાં પ્રપન્નોઽસ્મિ ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૫૧॥

કૃષ્ણાવધૂતેન ગીતેન માત્રક્ષરાઘેન ગાથાસ્તવેનેડ્ય ભો ।
શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય શ્રીરાઘવેન્દ્રાર્ય પાહિ પ્રભો ॥ ૫૨॥

ઇતિ શ્રીમત્કૃષ્ણાવધૂતપણ્ડિતકૃતૌ શ્રીરાઘવેન્દ્રતન્ત્રે એકાદશપટલે
ગાથાસ્તુતિઃ સમાપ્તા ।

રાઘવેન્દ્ર અક્ષરમાલિકાસ્તોત્રમ્

Proofread by Gopalakrishnan, PSA Easwaran

---

*Shri Raghavendra Gatha Stuti*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*